|| শ্রী ||

অথ শ্রী ত্রিবিক্রমপংডিতাচার্য়সুত শ্রী নারায়ণপংডিতাচার্য়বিরচিতঃ

# || শ্রী মধ্ববিজয়ঃ ||

## ৮. অষ্টমঃ সর্গঃ

প্রতিভাপ্রভাপ্রমুখসদ্গুণৈর্নিজৈঃ অতিবিস্ময়ং নিয়মিনাং মনো নয়ন |
পুরুধীঃ কদাচিদথ বেদনায়কং বিজনে শনৈরুপসসাদ তং বনে || ৮.১ ||

সুবিশেষশেষবদশেষবর্ণিতপ্রতিবোদ্ধুরস্য ননু শিষ্যতোচিতা |
গুরুমানসস্য গুরুতাঽপি সৎপতেঃ ইতি সোপসত্তিরমরৈরমান্যত || ৮.২ ||

পুর এব পূরিতমপূরয়ত পুনঃ ননু কৃষ্ণ এষ পরমার্থসংখ্যয়া |
ভগবন্মনঃ পুরমিবাঽয়তং পুরা নিজধাম তাং চ জগৃহে তদদ্ভুতম || ৮.৩ ||

ইতিহাসসুংদরপুরাণসূত্রসৎপ্রিয়পংচরাত্রনিজভাবসংয়ুতম |
অশৃণোদনংতহৃদনংততোঽচিরাত পরমার্থমপ্যগণিতাগমাবলেঃ || ৮.৪ ||

ঋজুপুংগবস্য পরিজানতঃ স্বয়ং সকলং তদপ্যলমনংতজন্মসু |
স্বকৃতোর্বনুগ্রহবলাদমুষ্য তাং বিশিশেষ শেষশয়নঃ পুনর্ধিয়ম || ৮.৫ ||

অথ বাদরায়ণসহায়সংপদা প্রয়য়ৌ প্রণংতুমমিতাংতরো য়ুতঃ |
অপি নাদিরায়ণপদোদিতং হরেঃ বপুরংতরং লসিতমাশ্রমাংতরে || ৮.৬ ||

তমপশ্যদাশ্রমবরে প্রভূতধীঃ জ্বলনং জ্বলংতমিব ধূমবর্জিতম |
বরবল্কলাকলিতমৌংজিমেখলং বিলসজ্জটাবলয়মাদিপূরুষম || ৮.৭ ||

অতিদুর্জয়েংদ্রিয়জয়াদিরূপিণা তপসা বসংতমিব সংততং বনে |
নিজরূপভূতনিরপেক্ষনির্মলপ্রচুরাত্মসৌখ্যরতমপ্যনারতম || ৮.৮ ||

নয়নদ্বয়েন নলিনপ্রভামুষা পরিফুল্লতাবিলসিতেন বিস্ময়াত |
তমবেক্ষ্য ধর্মজমধর্মদুর্লভংমনসেতি ভূরিতরমানসোঽস্মরত || ৮.৯ ||

জগতাং চতুর্দশতয়ং চতুর্মুখ প্রমুখৈর্যুতং প্রলয়মানিনায় য়ঃ |
সমমুল্লসন কমলয়ৈব কেবলং পরমঃ স এষ হি পুরাণপূরুষঃ || ৮.১০ ||

ত্রিগুণাকৃতিপ্রকৃতিতো গুরুং ততঃ ত্রিবিধামহংকৃতিমমর্ত্যখান্যতঃ |
অপি ভূতপংচকমিতোঽ ংডমংডলং ভগবানসাবিহ জগংতি চাসৃজত || ৮.১১ ||

বিধিবায়ুবীংদ্রশিবকৌশিকেশকান অমরামরানুগনরাসুরাদিকান |
সৃজতি প্রপালয়তি হংতি সংততং স্বগতিং প্রয়াপয়তি চৈষ লীলয়া || ৮.১২ ||

অগণয্যসদ্গুণগণো বিদূষণঃ স্ববশাখিলোঽপ্যনুপচারতঃ স্বয়ম |
স্মৃতিকীর্তনপ্রণতিভির্বিমুক্তয়ে স্বজনস্য য়াত্যয়মনেকরূপতাম || ৮.১৩ ||

চতুরাননায় চতুরঃ পুরাঽঽগমান প্রদদাবসাবনিমিষেশ্বরঃ ফ্রভুঃ |
বিনিহত্য হি শ্রুতিমুষং পুরাতনং বপুষোদ্ধতং হয়মুখেন সদ্রিপুম || ৮.১৪ ||

অমরেংদ্রবৈরিভুজদংডমংডলপ্রতিকর্ষপুষ্করপতদ্ধরোদ্ধৃতিঃ |

বিদধে বরাহবপুষাঽমুনোর্মিমৎসৃতিসিংধুকচ্ছপতয়াঽঽপ্তরক্ষিণা || ৮.১৫ ||

নরসিংহ এষ বিদদার দারুণং প্রতিঘোদয়েনখরচক্রতেজসা |
স্বরিপুং ক্ষণেন সরসঃ স্ফুরত্তনুং পৃথুসত্ত্বমিষ্টজনভীতিভংজনঃ || ৮.১৬ ||

অপি বামনো ললিতবাল্যবানয়ং প্রতিভাবলেন কৃতদৈত্যকৌতুকঃ |
উপধেরধঃ কৃতবলীংদ্রশাত্রবঃ স্বজনায় কেবলমদাত পরং পদম || ৮.১৭ ||

কথয়ংত্যমুং পরশুভাসমানগোহতমর্ত্যদেবতমসং মুহুর্মুহুঃ |
জগতাং হিতং হরিমিবাপরং হরিং গুরুশক্তিতাপসবরান্বয়োদ্ভবম || ৮.১৮ ||

করুণাকরঃ সবসুদেবমোদদো ভগবান পুরাঽহিমকরান্বয়েঽভবত |
জিতবান দিশো দশরথোঽগ্র্যসংপদো জনকো বভূব ভুবি য়স্য বৈরিহা || ৮.১৯ ||

ভুজগেশ্বরোঽপি ভুবনেশ্বরপ্রিয়ঃ সমজন্যথারিদরজন্ম ভুব্যভৃত |
তমমুষ্য কাংতিবিজিতেংদুমগ্রজং রমণীয়মাহুরিহ রামনামকম || ৮.২০ ||

জনকেন সোঽথ বিরহাসহিষ্ণুনা মুহুরীক্ষিতো বনমনীয়ত প্রভুঃ |
চকিতেন দুষ্টজনতস্তপস্বিনা তত আসুরীং নিশিচরীং জঘান সঃ || ৮.২১ ||

মুনিসপ্ততংতুকৃতবৈরবংধনং কটুকেশ্যরিষ্টপদমুখ্যদুর্জনম |
ক্ষপয়ংতমুদ্যতসুবাহুমাহবে তমথাভ্যনংদদমরাদিসদ্গণঃ || ৮.২২ ||

সবনে বিকস্বরগুণস্বরদ্বিজে স্ফুরিতে চরন সকলগোকুলপ্রিয়ঃ |
ইতকামতাপসরসার্দ্রধীগিরঃ প্রতিলালয়ন্নরমতৈষ সুংদরীঃ || ৮.২৩ ||

সহজান্বিতঃ সকলমিত্রসংয়ুতো মধুরাং পুরীং জনকবল্লভাং গতঃ |
প্রবিশন্নিমাং স জগদেকসুংদরো নরনার্য়ুদারনয়নোৎসবোঽভবত || ৮.২৪ ||

অথ খংডিতেশ্বরধনুঃ স লীলয়া ক্ষপিতোগ্রসেননৃপপুত্রপৌরুষঃ |
সমুপাস্য বিপ্রগুরুমব্জভূগুরুঃ স্বজনানমোদয়দমেয়তেজসা || ৮.২৫ ||

কমলাময়ং কমলপত্রলোচনাং ভুবমাগতাং নৃপসুতাং গৃহীতবান |
নিজলীলয়া বিজিতরাজশাত্রবো মুদমাপদাপ্য পুরমব্ধিদুর্গমম || ৮.২৬ ||

স জগাম মাতৃজনতুষ্টয়ে কিল ত্বরিতোঽবনং বিদধদীপ্সিতং সতাম |
সহ ভার্য়য়াঽপি শুভয়া মহাজয়ধ্বজলক্ষ্মণাগ্র্যসুহৃদা বিনা[ঽ]মুদা || ৮.২৭ ||

সমতীতপর্বতপুরোগদুর্গমঃ খরদূষণাদিসুজনদ্বিষো বহূন |
স নিহত্য বিশ্বভয়দং সুদুস্সহং নরকং মহাতম উতানয়ত ক্রমাত || ৮.২৮ ||

রুচিরাশ্রমাজিরচিতাগ্র্যতেজসা প্রিয়য়া প্রিয়ো ভুবনমান্যয়া সমম |
ভৃশমাকুলী কৃতমদপ্রমাদবৎসুরপারিজাতহৃদবাপ ধাম সঃ || ৮.২৯ ||

হরিতামধীশনরদেবমংডলং দশকং বিজিত্য পরভীষণং মুহুঃ |
স্ফুরিতামিহ প্রিয়তমাং নিজশ্রিয়ং ভগবানুপৈক্ষত হরংতমপ্রিয়ম || ৮.৩০ ||

অভিনংদিতঃ পবননংদনাদিভিঃ স কদাচিদিংদ্রসুতবর্ধকো গবা |
নিজরাজ্যমাত্মদয়িতায় দত্তবান হরিসূনবে হতবিপক্ষমুত্তমম || ৮.৩১ ||

মুদমাপ্য তত্র দয়িতোরুবার্ত্তয়া মধুহা মরুৎসুতমুখপ্রবৃত্তয়া |
হরিতিগ্মচক্রলসিতোঽব্ধিমধ্যগং প্রয়যৌ স পুণ্যজনসেবিতং পুরম || ৮.৩২ ||

পৃথুকুংভকর্ণগজরাজমুদ্ধতং সসহোঽদরং সবিবুধেংদ্রশাত্রবম |
ধরণীভরং পৃথুলচক্রমক্ষিণোত নিশিতেষুচক্রকৃতবিক্রমঃ প্রভুঃ || ৮.৩৩ ||

অথ ভার্য়য়া হুতবহং প্রবিষ্টয়া সহিতঃ সহোদরপুরস্সরৈরপি |
অয়মাপ্য ধাম চিরমিশ্টদঃ সতাং নিজমূলরূপপরমৈক্যমেয়িবান || ৮.৩৪ ||

মহিদাসপূজ্যচরণো দ্বিজাদভূদ বিদিতাত স বিষ্ণুয়শসোঽমলাত্মনঃ |
ইহ য়ো দধে জগতি পাপশাংতয়ে বহুধামহেতিমতিদীপ্তগোস্থিতিম || ৮.৩৫ ||

সুতপোরুচেরয়মপাপকর্দমাত ননু মানবী তনয়তামুপেয়িবান |
সময়েন ভূরিনিজভক্তিপূরিতান সমজীজনত সুমনসঃ স দেবরাট || ৮.৩৬ ||

সুবৃহৎপয়োধরমিথঃ প্রসংহতিপ্রকটীভবৎপরময়ৌবনাকৃতিঃ |
অসুরাহিতাং বরবিলাসিনী তনুঃ প্রদদাবমুষ্য সুররাশয়ে সুধাম || ৮.৩৭ ||

সুজনায় দত্তপদ আত্মশুদ্ধিদঃ সুকুমাররূপ্যভবদেষ শাশ্বতঃ |
অনসূয়য়া শুচিমনীষয়া ধৃতঃ পরমাদরেণ মুনিপুংগবোঢয়া || ৮.৩৮ ||

দয়িতঃ সতামৃষভ এষ ভূধরো বপুরুদ্বহন পরমহংস লক্ষণম |
ব্যহরদ্বলক্ষতমপক্ষশোভনং পরতত্ত্বলিপ্সুসনকাদিবংদিতঃ || ৮.৩৯ ||

উদপাদি ধর্মতনয়ো হ্যয়ং হরিঃ নরদেবসোদর উদারবিক্রমঃ |
অপি কৃষ্ণ ইত্যভিহিতো মুদে সতাং স্বয়মেব য়স্য সহজো ব্যজায়ত || ৮.৪০ ||

পরমাত্মনে সততমেকরূপিণে দশরূপিণে শতসহস্ররূপিণে |
অবিকারিণে স্ফুটমনংতরূপিণে সুখচিৎসমস্ততনবে নমোনমঃ || ৮.৪১ ||

ইতি চিংতয়ন্নবিরলাংতরো হরিং প্রণনাম সপ্রণয়মাদৃতোঽমুনা |
অজিতৌ পরস্পরসভাজিতৌ স তৌ নিকষা নিষীদতি পুরোপবেশিনৌ || ৮.৪২
||

বিবিধা বিধায় কিল তত্র সংকথাঃ বদনং মুনীংদ্রতনয়স্য সুংদরম |
অবলোক্য লোকপতিরানতং মহাসুখতীর্থমাহ রহসি স্ম গামিমাম || ৮.৪৩ ||

শৃণু দেবকার্যমবধার্য় ধৈর্যবদ য়ুদুদীর্যমাণমিদমার্যসম্মতম |
ভবিতাঽন্যদুষ্করতরং বিধায় তত্তরুণং তবাবতরণং মহাফলম || ৮.৪৪ ||

অপিধায় সূত্রহৃদয়ং সতাং প্রিয়ং প্রবিধায় ভাষ্যমধুনা নিজেচ্ছয়া |
অপরৈঃ শ্রুতিস্মৃতিনিজার্থদূষকৈঃ সুতরাং তিরোভবতি সংবিদাহতা || ৮.৪৫ ||

অপনেতুমেনমনয়ং কৃতং খলৈঃ প্রতিনেতুমাত্মজনতাং শুভাং গতিম |
কুরু সূত্রভাষ্যমবিলংবিতং ব্রজেঃ সুমতেন য়োজয় কবে শ্রুতিস্মৃতীঃ || ৮.৪৬ ||

অমিতাং মিতামপি গিরং জগদ্গুরোঃ ইতি তাং নিশম্য বিরলেতরাংতরঃ |
বদতাং বরস্তমবদত তদা তয়োঃ বিরহাক্ষমঃ খলু চরাচরেশয়োঃ || ৮.৪৭ ||

ভবতোরিতঃ সততসেবনামৃতে মম মংক্ষুমস্তু ভগবন্ননুগ্রহঃ |
ন লভেয় বল্লভতমেদৃশং সুখং জগতাং ত্রয়েঽপি জগদেকমংগলম || ৮.৪৮ ||

কলিকালকালিতগুণে ধরাতলে সুজনো ন নূনমধুনাঽস্তি য়োগ্যধীঃ |
পরতত্ত্ববর্ণনময়োগ্যতাবতে ননু হব্যদানমিব নিংদ্যতে শুনে || ৮.৪৯ ||

ইতি তং ব্রুবাণময়মব্রবীদ বিভুঃ ভুবি সংতি সৌম্য পুরুষা গুণোচিতাঃ |
বিমলান মণীনিব গুণোজ্ঝিতানিমান দয়য়া বিশোধয় বিশুদ্ধগোগণৈঃ || ৮.৫০ ||

তব কীর্তিরার্তিমতিমাত্রমানয়েদশুভান প্রভাকরবিভেব কৌশিকান |
কমলাকরানিব শুভান প্রবোধয়েত পরমাজ্ঞয়া মম বিশেষতোঽনিশম || ৮.৫১ ||

ইতি সা মহীধরমুখাদ বিনিঃসৃতা জগতাং সুখায় বিশদা সরস্বতী |
দ্বিজরাজগোবিষয়তাতিপূরিতং প্রবিবেশ মধ্বপৃথুবুদ্ধিবারিধিম || ৮.৫২ ||

মতমিত্যবেত্য মহিতং মহতোঃ অভিধায় বাঢমিতি ধীরমতিঃ |
অনয়োর্নিয়োগমধিরোপিতবান স্বশিরস্যনন্যসুবহং প্রণমন || ৮.৫৩ ||

আম্নায়াস্ত্রয় ইব তত্ত্ববোধকাস্তে পাপঘ্নাস্ত্রয় ইব পাবকাঃ প্রজানাম |
লোকা বা সকলভৃতস্ত্রয়োঽত্র রেজুঃ সানংদা মুনিসুতধর্মসূনুমধ্বাঃ || ৮.৫৪ ||

|| ইতি শ্রীমৎকবিকুলতিলক ত্রিবিক্রমপংডিতাচার্য়সুত
নারায়ণপংডিতাচার্য়বিরচিতে শ্রীমধ্ববিজয়ে
আনংদাংকিতে অষ্টমঃ সর্গঃ ||

www.yousigma.com